आत्मज्ञानोपदेशविधिः

अथ प्रथमः पटलः

अथात्मज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षवे श्रद्दधानाय यतये वीतरागाय, आत्मलाभात् परलाभाभावात्। द्रष्टुर्दृश्योऽन्य इति प्रसिद्धो लोके। अथ क आत्मेति? देहस्तावदात्मा न भवति रूपादिमत्वेनोपलभ्यमानत्वात् घटादिवत्। यथा घटादयो रूपादिमन्तः चक्षुरादिकरणैरुपलभ्यन्ते एवं देहोऽपि रूपादिमान् चक्षुरादिकरणैरुपलभ्यते। यथा दाह्यप्रकाश्यकाष्ठादिव्यतिरिक्तो दाहकः प्रकाशकोऽग्निः तथा दृश्यात् देहात् द्रष्टा व्यतिरिक्तः आत्मा सिद्धः। एतस्मादपि कारणात् देहव्यतिरिक्तः आत्मा, स्वापमरणादिदर्शनात्। यस्मिन् काले देहं संव्याप्य वर्तते आत्मा काष्ठादिवत् तदा देहो व्यवहारयोग्यो भवति। यदा देहादपसर्पति तदा देहः काष्ठादिसदृशो भवति। तस्माद्देहव्यतिरिक्त आत्मा सिद्धः।

चक्षुरप्यात्मा न भवति रूपग्रहणसाधनत्वात् प्रदीपवत्। यथा प्रदीपेन करणेनरूपमुपलभ्यते, तथा चक्षुरादिकरणेन रूपमुपलभ्यते। एवमेवेतराण्यपि करणानि। मनोऽप्यात्मा न भवति दृश्यत्वात् करणत्वाच्च प्रदीपवत्। बुद्धिरप्यात्मा न भवति दृश्यत्वात् करणत्वाच्च प्रदीपवदेव। प्राणोऽप्यात्मा न भवति, सुषुप्ते चैतन्याभावात् प्राणस्य, इतरस्मिन् काले भृत्यस्वामिनोरिव सङ्कीर्णयोर्न ज्ञायते कस्येदं चैतन्यमिति। सुषुप्ते तु पुनः विज्ञानरहितः प्राण उपलभ्यते। करणोपरमाद्विज्ञानाभावः प्राणस्येति चेत् न, स्वामिनि व्याप्रियमाणे करणोपरमाभावात् राजपुरुषवत्। अत एव न प्राणस्यैतानि करणानि; यः स्वापेनोपरतः तस्यैतानि करणानि। यदासौ बहिर्निर्गम्य करणान्यधितिष्ठति तदा सर्वाणि करणानि स्वविषयेषु वर्तन्ते। यदा जाग्रत्स्थितिनिमित्तं कर्मोद्भूतं भवति तदा स्वापादुपरतो भवति तत्क्षये सर्वाणि करणानि गृहीत्वा बुद्ध्युपाधिसम्पर्कजनितविज्ञानेन स्वप्नं सुषुप्तं वा गच्छति। एवं स्थानत्रयमनवरतं गच्छति। कर्मनिमित्तं चेदं गमनम्। स्वप्नजागरिते गच्छति पुनः स्थानद्वयनिमित्तकर्मोद्भूतश्रमापनयनाय सुषुप्तमपि गच्छति। प्राणोऽपि तत्कर्मवशादेव शरीरं परिपालयन् वर्तते सवप्न- सुषुप्त्योर्मृतभ्रान्तिपरिहाराय।

अहमित्यपि चात्मा न भवति सर्वैरात्मत्वेनाभिमतोऽपि प्रत्यगात्म- विवेकरहितैः, दृश्यत्वात् घटादिवत्, व्यभिचारात्, सुखदुःखाद्यनेकसंसारधर्मविशिष्टत्वाच्च, कृशस्थूलादिधर्मविशिष्टदेहवत्। यद्येवं देहादिष्वनात्मसु आत्मत्वाशङ्का कुत इति चेत्। द्रष्टुर्दृश्यविवेकाभावात्।

।। इत्यात्मज्ञाने प्रथमः पटलः।।

अथ द्वितीयः पटलः

अथ स आत्मा क इति? उक्तेभ्यः सर्वेभ्यो व्यक्तिरिक्तेभ्यः अन्तरतमः आकाशवत् सर्वगतःसूक्ष्मो नित्यो निरवयवो निर्गुणो निरञ्जनो गमनागमनादिरहितोऽहङ्कारममकारेच्छा- प्रयत्नरहितः स्वयंज्योतिःस्वभावः अग्न्युष्णवत् सवितृप्रकाशवच्च, आकाशादिभूतरहितः बुद्ध्यादिकरणरहितः प्राणादिवायुभेदरहितः सत्वादिगुणरहितः अशनायापिपासाशोकमोहजरामरण प्राणबुद्धिशरीरधर्मरहितो यः सर्वप्राणिहृदि स्थितः सर्वबुद्धेर्द्रष्टा स आत्मेति। सर्वबुद्धि-विशिष्टतयोपलभ्यमानत्वात् सर्वप्राणिहृदि स्थितः इत्युच्यते, न पुनःसर्वगतस्य निरवयवस्यात्मनो बुद्ध्याधारत्वं सम्भवति। यथाऽऽकाशस्य न कश्चित्पदार्थ आधारो भवति।

कथमहङ्कारममकारेच्छाप्रयत्नरहितस्य आत्मनो द्रष्टृत्वमिति? द्रष्टृत्वं नाम दर्शनक्रियां करोतीत्यर्थः। यदि दर्शनक्रियां करोति द्रष्टा आत्मा तदा अशेषबुद्धिद्रष्टृत्वं नोपपद्यते। विरोधात्। यथा देवदत्तस्य क्रमानुरोधेन युतायुतसिद्धकरणादिसव्यपेक्षया गमनादिक्रियाकर्तृत्वं, नोभयप्रकारकरणसम्बन्ध-रहितस्याविक्रियस्य दृग्रूपस्यात्मनो दर्शनादिक्रिया स्यात्। यस्य तु पुनः करणादिसव्यपेक्षद्रष्टृत्वं तस्याल्पविषयद्रष्टृत्वं क्रमद्रष्टृत्वम् अद्रष्टृत्वम् अन्यथाद्रष्टृत्वञ्च स्यात् परिणामित्वात्, करणादिसव्यपेक्षत्वाच्च चित्तवत्, नैवमात्मनोऽल्पविषयद्रष्टृत्वं क्रमद्रष्टृत्वम् अद्रष्टृत्वम् अन्यथाद्रष्टृत्वञ्चेष्यते। विक्रिया अभावात् कारणादिनिमित्तनिरपेक्षत्वाच्च चित्तप्रदीपवदेव। कथं बुद्ध्यात्मनोः संयोग इति। उच्यते। सूक्ष्मत्वात् स्वच्छत्वान्निरवय- वत्वाच्चोभयोः। तत्र शुद्धप्रकाशस्वरूप आत्मा स्फटिकमणिवच्च बुद्धिरप्रकाशस्वरूपा सती

प्रकाशसन्निधिमात्रेण प्रकाशस्वरूपा च भवतीति बुद्ध्यात्मनोः संयोग इत्युच्यते, न तु पुनरमूर्तयोर्बुद्ध्यात्मनोः जतुकाष्ठवत् संश्लेषः सम्भवति। अनन्यापेक्षत्वाच्च द्रष्टृत्वस्य। यथाऽहङ्कारममकारेच्छाप्रयत्नरहितस्य प्रकाशस्वरूप-सन्निधि-सत्तामात्रेण वर्तमानस्यादित्यस्य प्रकाशकत्वमध्यारोप्यते अन्यैः प्रकाश्याभिव्यक्त्यपेक्षया। एवमेव सर्वविक्रियारहितस्यात्मनो दृग्रूपस्य चैतन्यस्वरूपेणाव्यतिरिक्तेन सर्वप्रत्ययसाक्षिणो द्रष्टृत्वं उपचर्यते दृश्याभिव्यक्त्यपेक्षया। अन्यथा द्रष्टृत्वाभावात्तस्य।

कथं सर्वविक्रियाविशेषरहितस्यात्मनः कर्तृत्वमिति। उच्यते। भ्रामकवत्। यथा भ्रामकः स्वरूपसन्निधिसत्तामात्रेण लोहस्य प्रेरको भवति एवमेव सर्वविक्रियाविशेषरहितोऽप्यात्मा कारकावभासको भवति। तत्र कारकवभासकत्वं नाम–बुद्ध्यादीनि करणानि कारकाण्युच्यन्ते। तानि चैतन्यावभासितानि स्वविषयेषु प्रवर्तन्ते। तत्रैवं सति सर्वविक्रिया-विशेषरहितस्यात्मनः कर्तृत्वमुपचर्यते। एवमात्मानं कथं बुद्ध्या विजानीयादिति। तन्न शक्यते वक्तुं बुद्धेरवभासकत्वात्, आदित्यज्योतिरिव यथा आदित्यो रूपेण न प्रकाश्यते एवमात्मा न दृश्यते बुद्ध्या। एतस्मादप्यात्मा न दृश्यते बुद्ध्या, बुद्धेः वेद्याया वेदितृत्वानुपपत्तेः। यदि तस्या अपि वेद्याया वेदितृत्वं स्यात् वेद्यता न स्यात् समत्वात् प्रकाशयोरिवेति।

।। इति द्वितीयः पटलः।।

अथ तृतीयः पटलः

तत्र जाग्रत्स्वप्नसुषुप्तान्युपन्यस्यन्ते बुद्धेरवस्थाविशेषाः। तेषां परित्यागार्थमात्मविशुद्धिप्रतिपादनाय च। तत्र जागरणम्–चक्षुरादीनि करणान्यादित्याद्यनुगृहीतानि स्वविषयेषु प्रवर्तन्ते। तत्र बुद्धिरपि करण-व्यापारमनुभवति। तत्र प्रत्यागात्म-चैतन्यावज्वलितोभयात्मिकाऽपि द्रष्ट-दृश्याकाराऽपि परिणमते। तत्र प्रत्यागात्मेति कस्मादात्मा विशेष्यते? व्यभिचारिणामनात्मत्वख्यापनार्थम्। तत्र बुद्ध्यादीनि करणानि घटादिवत् दृश्यभूतान्यपि बाह्यापेक्षया तारतम्यक्रमेण प्रत्यगात्म- संयोगादात्मानो भवन्ति।

उदकस्याग्निसंयोग इवोष्णत्वं, न त्वात्मनः तत्संयोगादनात्मत्वं सम्भवति उदकसंयोग इवाग्नेरनुष्णत्वं न त्वात्मनः प्रत्यगात्मत्वं कदाचिदपि व्यभिचरति आत्मा-भ्यन्तरवस्त्वन्तराभावात् बुद्ध्यादीनामिव। अत आत्मा प्रत्यगात्मेति विशेषणार्थः। एवं सत्यव्यभिचारित्वमात्मनः ख्यापितं भवति।

तत्र प्रत्यगात्मचैतन्यावज्वलिता द्रष्ट्राकाराऽपि परिणमते तप्तलोहवत्, दृश्याद्युपरक्ता विषयाकार द्रुतताम्रादिवत्। तत्रैवं सति तदुभयसाक्षिणः कालाकाशवत् सर्वगतस्याविक्रियस्य दृग्रूपस्य आत्मनो जागरणमिव भवति। अथ पुनः सा धीः रूपाद्याकारवासिता रूपाद्यन्तरेण पुष्पपेटिकेव अविद्या-कामकर्मभिः प्रेर्यमाणा संस्काररूपा दृश्यत्वेन व्यवतिष्ठते। तद्दर्शिनः स्वप्न इव भवति तदनुकारित्वादात्मनो जलचन्द्रवत्।

अथ पुनः सा धीः स्फुरणरहिता वासनारूपेण स्वरूपशून्येव चैतन्यग्रस्ता सामान्यरूपेण व्यवतिष्ठते। तत् सुषुप्तमिव भवति वटकणिकायामिव वटवृक्षः।

।। इति तृतीयः पटलः।।

अथ चतुर्थः पटलः

तत्र चिन्मात्रस्वरूप आत्मा कार्यकरणाविद्याकामकर्मविनिर्मुक्तः सलिलवत् स्वच्छः स्वात्मस्थो भवति। एतानि बुद्धेरवस्थाविशेषणानि नात्मनः, आत्मनोऽविक्रियत्वात्। एतानि परित्यज्य तुरीय आत्मेति प्रतिपत्तव्यः। अत्र तुरीयत्वं नाम सुवर्णघनवद्विज्ञानघनत्वं, तथापि चैतन्यस्वरूपसन्निधिमात्रेण साक्षिमात्रत्वं तत् न स्थानान्तरमात्मप्रतिपत्तिभावात्, शून्यत्वप्राप्तेः, कल्पितानाञ्च निरास्पदत्वानुपपत्तेः।

कथमेतान्यात्मविशुद्धिप्रतिपत्तिहेतूनि भवन्ति। एतेषु हि सत्सु आत्मविशुद्धिरवगम्यते। कथमवगम्यत इति। उच्यते। एतेषु त्रिष्वपि स्थानेषु द्रष्टृत्वाव्यभिचारात्। सुषुप्ते व्यभिचरतीति चेत्; न, तत्रापि दृश्यमेव निवारयति सर्वो लोकः। कथं, नाहमत्र सुषुप्ते किञ्चिदप्युपलब्धवानिति न दृष्टिम्। तस्यास्तर्हि सर्वत्र अव्यभिचारात्। अत एव कूटस्थनित्य आत्मा सिद्धः स्वत एव न

प्रमाणान्तरापेक्षया। आत्मनस्तु प्रामाणापेक्षा सिद्धिः कस्य प्रमातृत्वं स्यात्। यस्य प्रमातृत्वं स एवात्मेति निश्चीयते। नन्वागमेनात्मा परिच्छिद्यते। न। आगमोऽप्यात्मन्यध्यारोपितातद्धर्म-निवर्तनद्वारेण ब्रह्मात्मनोरेकत्वप्रतिपत्तिं प्रति मानत्वं प्रतिपद्यते। निर्ज्ञातपदार्थद्वयस्यानिर्ज्ञातार्था-भिव्यञ्जकमेतत, स्वतः सिद्धत्वादात्मनः। सोऽहमिति स्मृत्या प्रतिसन्धानात् पुण्यापुण्य सम्बन्धाभावात् स्थानत्रयव्यतिरिक्तत्वं नित्यत्वं शुद्धत्वं मुक्तत्वं बुद्धत्वम् अविक्रियत्वम् अलुप्तदृक्स्वरूपत्वम् एकत्वं चात्मनः स्वानुभवेनैव मम सिद्धमिति जानाति विद्वान्। आचार्यप्रसादादज्ञाननिद्राप्रबुद्धः संसारविनिर्मुक्तो विद्वान्। एष आत्मज्ञानोपदेशविधिः।

एवं ज्ञात्वा कृतकृत्यो भवति नान्यथेत्येवं वेदान्तानुशासनं वेदान्तानुशासनमिति।

।। इति चतुर्थः पटलः।।

।। इति श्रीशङ्करभगवत्पादाचार्यविरचितः आत्मज्ञानोपदेशविधिः समाप्तः।।